टीकाः—इदानीं योग्यस्य श्रोतुः पुरतः साधुवेषकल्पिते पथि दशभिर्द्धारैस्तत्प्ररूपितं धर्मं प्रतिपादयन् तस्य च कर्मनिर्मूलनाऽक्षमत्वं संभावयन्निदमाह ॥

अर्थः—हवे योग्य श्रोतानी आगल साधुवेषधारी लोकोए पोतानी मतिथी कल्पेला मार्गने विषे दशद्धारे करीने तेमणे प्ररूपणा कर्यो जे धर्म ते देखाडे छे. ने ते धर्म कर्मने मूलमांथी उखेडवाने समर्थ नथी, एम संभावना करता छता आ काव्य कहे छे.

॥ मूलकाव्यं ॥

अत्रौद्देशिकभोजनं जिनगृहे वासो वसत्यऽक्षमा,
स्वीकारोर्थगृहस्थचैत्यसदनेषप्रेंक्षिताद्यासनं ॥
सावद्याचरितादरः श्रुतपथावज्ञा गुणिद्वेषधी,धर्मः
कर्म्महरोऽत्र चेत्पथि भवेन् मेरुस्तदाब्धौ तरेत्॥५॥

टीकाः—अत्र पथि अयं धर्मश्चेत्कर्म्महरो भवेत् तदा मेरुरब्धौ तरेदिति संबंधः ॥ अत्र अस्मिन् प्रत्यक्षोपलभ्यमाने पथि लिंगिकल्पिते मते धर्म्म औद्देशिकभोजनादिकः ॥ अयं चेद्यदि कर्म्महरो ज्ञानावरणादिनिरासदक्षो भवेत्स्यात्तदा तदानीं मेरुर्लक्षयोजनच्छ्रयः पर्वतराजः ॥ अब्धौ सागरे तरेत् प्लवेत् ॥

अर्थः—आ लिंगाधारीये कल्पेला मार्गनो धर्म जो कर्मनो

नाश करे तो मेरु पर्वत समुद्रमां तरे ए प्रकारे संबंधः, आ प्रत्यक्ष जणातो लिंगधारीये कल्पेलो जे मत तेने विषे औद्देशिक भोजनादिक जे धर्म ते जो कर्मने हरे एटले ज्ञानावरणादिक कर्मनो जो नाश करवामां समर्थ होय तो लाख योजननो मेरु नामे पर्वतनो राजा ते समुद्रमां तरे, एटले जेम मेरु पर्वत समुद्रमां न तरे तेम लिंगधारीये कहेलो धर्म कर्मने न हरे.

टीकाः—अयं च निदर्शनालंकारः ॥ अभवन् वस्तुसंबंध, उपमापरिकल्पक इति तल्लक्षणात् ॥ ततश्चात्र प्रस्तुतधर्मकर्महरत्वयो मेरुसमुद्रतरणयोश्च संबंधोऽनुपपद्यमान उपमानोपमेयभावे पर्यवस्यति ॥ मेरोः समुद्रतरण मिव प्रस्तुतधर्मस्य कर्महरत्वं ॥ ततश्चायमर्थः ॥ समुद्रे पाषाणशकलमात्रस्यापि तरण मसंभवि, किंपुनर्मेरोः ॥ ततो यथा मेरोः समुद्रतरण मघटमान मेव मस्य धर्मस्य कर्महरत्व मिति ॥

अर्थः—आ निदर्शना नामे अलंकार थयो, तेनुं लक्षण अलंकार शास्त्रमां कह्युं छे उपमानी परिकल्पना करनार न थयेलो वस्तुनो संबंध ते निदर्शना नामे अलंकार कहीये माटे आ जगाये वर्णन कर्यो जे लिंगधारीनो धर्म तथा तेने कर्मनुं हरवापणुं ए बे उपमेय वस्तु छे. तेनो मेरुपर्वतने तथा ते पर्वतनुं समुद्रमां तरवापणुं ए बे उपमान वस्तु छे तेमनो न थएलो एटले अघटतो जे संबंध ते जे ते उपमान उपमेय भावने विषे पर्यवसान पामे छे एटले स्थिति करे छे इति अलंकार विचारः—मेरु पर्वतनुं जेवुं समुद्रमां तरवुं तेवुं वर्णन करीशुं एवो लिंगधारीये कहेलो धर्म तेने कर्मनुं हरवुं छे माटे आ भावार्थ सिद्ध थयो. जे समुद्रने विषे पाषाणना

कक्काने पण तरवानुं संजवतुं नथी तो मेरुपर्वतने नं संजवे तेमां शुं कहेवुं ? जेम मेरुने समुद्र तरवुं अघटतुं ठे तेम आ वेषधारीए कहेला धर्मने पण कर्मने हरवापणुं अघटतुंज ठे.

टीकाः—यत्र यस्मिन् पथि किं यतीनामौद्देशिकजोजनादिर्धर्म इष्यत इति सर्वत्र क्रियाध्याहारः ॥ तत्र उद्देशेन विकल्पेन यतीन्ममसि कृत्वा निर्वृत्तं निष्पादितम् औद्देशिकं ॥ क्रीतादित्वादिकण् ॥ तच्च तद् जोजनं चाऽशनादि ॥ यद्यपि सिद्धांत औद्देशिकशब्द उद्गमदोषद्वितीयन्नेदार्थः श्रूयते ॥ तथापी ह वक्ष्यमाणतृतीयवृतार्थपर्यालोचनेन आधाकर्मिके वर्त्तते ॥ तस्यैवेह केवलयतिनिमित्तविधीयमानत्वेन महादोषतया विवक्षितत्वात् ॥ उद्देशनिर्वृत्तत्वस्य च सामान्यव्युत्पत्त्यर्थस्योज्ञयत्रापि समानत्वात् ॥

अर्थः—जे मार्गने विषे शुं ठे ? तो यतिने औद्देशिक जोजन करवुं ए आदिक अधर्म तेने विषे धर्म इछे ठे, एम सर्व जगाये क्रियापदनो अध्याहार करवो, त्यां उद्देश शब्दनो विकल्प एटलो अर्थ ठे. एटले यतिने मनमां राखीने नीपजाव्युं जे जोजन ते औद्देशिक कहीए ॥ व्याकरण विचार ॥ क्रीतादिकमां ए शब्दनो पाठ ठे माटे इकण् प्रत्यय आवीने औद्देशिक शब्द सिद्ध थयो ठे माटे औद्देशिक एहेवुं जे अशनादिक जोजन त्यां सिद्धांतने विषे औद्देशिक शब्द जे ते सोल उद्गम दोष ठे तेनो बीजो जेद ठे ॥ ए प्रकारनो अर्थ सांजलीए ठीए तो पण आ जगाए आगल कहीशुं जे त्रीजुं काव्य तेनो अर्थ विचारी जोतां आधाकर्मिकरूपि अर्थ जणाय ठे. आ जगाए केवल साधु निमित्त जे करेलुं होय ते-

जोज महादोषपणे आगल कहेवानी इच्छा छे, माटे उद्देशे करीने निपजाव्युं एवो जे सामान्य व्युत्पत्तिनो अर्थ ते तो ये जगाए सरखो छे ए हेतु माटे.

टीकाः—अत्र च यतीनामौद्देशिकजोजनग्रहणे यथाछंदा उपपत्तिं दर्शयंति ॥ पूर्वं हि अधरितधनाधिपकोशागाराणि चैत्यसाधुषु यदुपयुज्यते तदेवास्माकं वित्तमन्यदनर्थं इत्यध्यववसायव्यंजितदेवगुरुजक्तिजराणि महीयांसि जूयांसि दानश्रद्धालुश्राद्धकुलान्यजूवन् ॥ ततस्तेषु कुलेषु तत्कालीनयतीनां प्रासुकैषणीयेनापिजैक्ष्येण निरावाधं निर्वाहोऽजविष्यत् ॥

अर्थः—आ जगाये साधुने आधाकार्मिक जोजन ग्रहण करवामां स्वेछाचारी लिंगधारी पुरुषो सिद्धांतथी विरुद्ध पोतानी मति कल्पनाथी युक्ति देखाके छे, जे पूर्वना कुबेर जंकारीनो द्रव्य जंकारने तिरस्कार करे एवां धनाधिपति श्रावकनां कुल हतां. ने एम जाणता हता जे आपणुं द्रव्य जेटलुं चैत्य साधु निमित्त वपराशे तेटलुंज सार्थक छे, ने बीजुं तो निरर्थक छे ए प्रकारना अध्यवसायथी देवगुरुनी जक्तिना समूह जेणे प्रगट कर्यो छे एवां अतिशे मोटां घणांक दान धर्मने विषे श्रद्धावालां श्रावकनां कुल हतां, ते हेतु माटे ते कुलने विषे ते कालना साधुने प्रासुक एषणीय जिक्षाये करीने एटले निर्दोष आहारे करीने पण निरावाध निर्वाह थतो हतो पण.

टीकाः—अधुना तु दुःषमाकालदोषात् दुर्जिक्षराजोपद्रवपरचक्रादिप्राचुर्येण दरिद्रतामल्पतां च गच्छत्सु तथा विधर्म-

हननशक्तिविकलानां शुद्धेन नक्तादिना संयमयात्रानिर्वाह जाते यदि कश्चिद्दानश्रध्धालुस्तीर्थाव्यवच्छेदमिच्छुः श्रावकः श्रमणसंघनिमित्तनिर्वृत्तनक्तादिनापि धर्माधारशरीरमुपष्टंजयेत् तदा को दोषः ?

अर्थः—हमणां तो उःखमा कालना दोषथी दुकाल तथा राजानो उपद्रव तथा परचक्रादि (शत्रुना सैन्यनां युध्धादि) कारणथी ते श्रावकनां कुल दरिद्रपणाने तथा अल्पपणाने पाम्यां वे माटे तेने विषे आ कालना ते प्रकारनी संघयण शक्तिये रहित एवा साधुने शुद्ध नक्तपानादिक करीने संयमयात्रानो निर्वाह नथी थतो माटे एज निमित्त कोइक दान श्रद्धावालो ने तीर्थनो उछेद न थाय एम इच्छतो एवो जे श्रावकने साधुनिमित्ते निपजाव्युं जे नोजनादि तेणे करीने पण धर्मनुं आधारनूत एवुं शरीर तेनुं उपष्टंन करे एटले साधु शरीरनो निर्वाह करे तो तेमां शो दोष वे अर्थात् कांइ पण नथी.

टीकाः—आत्मा च यतिना यथाकथंचन रक्षणीयः ॥ धर्मसाधनत्वात् ॥ यदुक्तं ॥ सव्वथ्थ संयमं संजमाउ अप्पाणमेव रक्खंतो ॥ मुच्चइ अइवायाओ पुणो विसोही नया विरई ॥

अर्थः—साधुए जेते प्रकारे आत्मा राखवो, एटले पाप लागे तो पण आत्मानी रक्षा करवी. जे माटे शास्त्रमां कह्युं वे जे सर्व जगाये संयमनी रक्षा करतो ने संजमथी आत्मानी रक्षा करतो एवो जे पुरुष ते पापथी मुकाय वे फरीथी शुद्ध थाय वे पण अविरति नथी थतो एटले चारित्रथी रहित नथी थतो.

टीकाः–तथा कथंचित् रूक्षन्नक्तादिदातृसद्भावेपि घृतादिव्यतिरेकेणाद्यतनयतीनां शरीरधारणानुपपत्तेः ॥ तत्कृते घृतादिनिश्रापि केनचित्पुण्यात्मना श्राद्धेन विधीयमाना समीची नैव प्रतिज्ञासते ॥

अर्थः–वळी कोइक प्रकारे लूखुं जोजनादिकना देनार मले पण घृतादिक विना आ कालना साधुने तेथी शरीर धारण थइ शकतुं नथी, माटे ते शरीर धारण करवाने अर्थे घृतादिकनी निश्रा पण कोइक पुण्यात्मा श्रावके करी होय ते ठीकज छे एम जणाय छे.

टीकाः–किंच ॥ यथाकथंचित् साधुजिः श्राद्धानां श्रद्धावृद्धये अशुद्धमपि ग्राह्यं ॥ तथैव तेषां पुण्योत्पत्तेः ॥

अर्थः–वली शुं ? तो जेते प्रकारे साधुये श्रावकनी श्रद्धा वधवाने अर्थे अशुद्ध पण ग्रहण करवुं केम जे तेवीज रीते ते श्रावकने पुण्यनी उत्पत्ति थाय छे ते माटे.

टीकाः–तदुक्तं ॥ अनेन पात्राय नियोजितेन स्यान्निर्जरा मे वसुनाधुनेति ॥ बुद्ध्या निराशंसतया ददानः पुण्यं गृहस्थः पृथु संचिनोति.

अर्थः–ते वात शास्त्रमां कही छे जे, पात्रमां आप्युं जे आ धन तेणे करीने मारे हमणां निर्जरा थशे ए प्रकारनी बुद्धिए करीने कोइ प्रकारनी वांछा रहित आपतो जे गृहस्थ ते घणुं पुण्य उपार्जे छे.

टीकाः–परोपकारश्चायं स्वकार्यमुपेक्ष्याप्यवश्यं कर्त्तव्यः

॥ यदुक्तं ॥ नियकज्जं यरकज्जं व, जे पमुतूण केइ विरइंति॥पर-
कज्जं नियकज्जं व, ते सु सप्पुरिसया वसइ

अर्थः—ने आ परोपकार तो पोतानुं कार्य मूकीने पण अव-
श्य करवा योग्य छे, जे माटे शास्त्रमां कह्युं छे जे जगतमां केटलाक
पुरुषो परकार्यनी पेठे पोतानुंज कार्य मुकीने पोताना कार्यनी पेठे
पारकुं कार्य करे छे एवा परोपकारी पुरूषने विषे सत्पुरुषता नि-
वास करे छे.

टीकाः-तस्माद्यतीनामाधाकर्मिकभोजनमदुष्टं, संयम-
शरीरोपष्टंभकत्वात् ॥ कल्पग्रहणवत् ॥ शुद्धभोजनवद्वा ॥
तथा यतिभिराधाकर्मिकभोजनं विधेयं, श्राद्धश्रद्धावृद्धिहेतु-
धर्मदेशनवत् ॥ इति प्रयोगावप्युपपद्येते ॥

अर्थः—ते हेतु माटे यतिने आधाकर्मिक भोजन करवुं ते
निर्दोष छे केम जे संजम शरीरने राखनार छे ए हेतु माटे कल्प
(वस्त्र) ग्रहण पेठे, एटले जेम वस्त्रादि छे ते संयम शरीरनुं पुष्टा-
लंबन छे, तेम आधाकर्मिक भोजन पण छे, अथवा जेम शुद्ध भो-
जन शरीर संयम शरीरने राखनार छे, तेम आधाकर्मिक भोजन
पण छे. वळी तेमज साधुए आधाकर्मिक भोजन पण करवा योग्य
छे, केम जे श्रावकनी श्रद्धा वधवामां कारण छे ए हेतु माटे धर्म
देशनानी पेठे जेम धर्म देशना छे, ते श्रावकनी श्रद्धा वधवामां
कारण छे माटे साधुने करवा योग्य छे, तेम ए प्रकारे अनुमान
प्रमाणना पण बे प्रयोग आ स्थलमां सिद्ध थाय छे.

टीकाः—तथा जिनानामर्हतां गृहमायतनं तत्र वासः

सर्वदावस्थानं ॥ इह केचित् सुखशीलतयोद्यतविहारं कर्तु-
मशक्नुवंतो यतीनां चैत्ये सर्वदावस्थानं युक्तमिति प्रतिपेदिरे॥

अर्थः—वली जिनराजनुं घर एटले चैत्य तेमां साधुने निरं-
तर रहेवुं एमने लिंगधारी साधुनो धर्म देखाडे छे, तेमां केटलाक
अति सुखसीलिया थया छे ते माटे उग्र विहार करवाने असमर्थ
थया माटे साधुने निरंतर चैत्यमां रहेवुं ते युक्त छे, एम अंगिकार
करे छे, तेमां सिद्धांत विरुद्ध नाना प्रकारनी युक्तिउ देखाडे छे.

टीकाः—तथाहि आधुनिकमुनीनां चैत्यवासमंतरेण उ-
द्यानवासो वास्यात्, परगृहवासो वेति, द्वयी गतिः ॥ तत्र
परगृहवासोऽग्रे निराकरिष्यते ॥ स्त्रीसंसक्त्याद्याधाकर्मिकादि-
दोषकलापन्नावात् ॥

अर्थः—ते युक्तिउ टीकाकार कही बतावे छे. जे आ कालना
मुनिने चैत्यवास विना उद्यानमां रहेवुं अथवा परघरमां रहेवुं ए
बे प्रकारनी गति छे, तेमां स्त्रीनो संसर्ग थाय तथा आधाकर्मिक
आदि घणा दोष उत्पन्न थाय ए हेतु देखाडीने परघर रहेवानुं
आगल खंडन करीशुं ने उद्यानमां रहेवानुं हाल खंडन करीए छीए.

टीकाः—उद्यानवासो यतीनां युक्त इति चेन्न ॥ तत्रापि
नूतनचूतांकुरास्वादकूजत्कलकंठपंचमोद्गारेण उन्मीलद्विच-
किलवकुलमालतीपरिमलेन च समाहितमनसामुत्कलिकादर्श-
नात् ॥ पंचमोद्गारादीनां चोद्दीपनविन्नावकत्वेन नरतादिशास्त्रेः
ऽन्निधानात् ॥

अर्थः—लिंगधारी सुविहित प्रत्ये जे बोल्या तमे साधुने उद्यान-

मां रहेवानुं युक्त कहेता हो तो ते वात युक्त नथी केम जे त्यां पण नवो आंबानो अंकुर तेनुं नक्षण करवाथी मधुर स्वर बोलतो जे कोयल तेना पंचम स्वर एटले सात स्वरमां पांचमो कामोद्दीपक स्वर तेना उल्लासे करीने तथा चारे पास प्रसरतो एवा प्रफुल्लित बहुल मालती आदिना सुगंधे करीने वश करेलां एवां पण मन मोकलां थाय एवुं देखाय ढे ए हेतु माटे अने पंचम स्वरनो उल्लास ते कामोद्दीपन थवानुं कारण ढे एम नरतादि शास्त्रमां कह्युं ढे ए हेतु माटे.

टीकाः—तथच्चिक्रीमिषागतकामुककामिनीसंकुलत्वेन च स्त्रीसंसक्त्यादेरपि तत्र नावात् ॥ अथवा माभूवन्ननवरत-शास्त्राभ्यासपरावर्त्तनादिपराणां यतीनामेतज्जन्या दोषाः ॥ तथापि लोकसंचारशून्योद्यानभूमौ वसतां चरटतस्करादिन्नि-रुपकरणापहारस्यापि संनवात्, तदपहारे च शरीरसंयमवि-राधनाप्रसंगात् ॥

अर्थः—वली क्रीमा करवानी इच्छाए त्यां आव्यां जे कामी पुरुष ने कामिनी स्त्रीयो तेणे करीने व्याप्तपणुं ढे माटे स्त्रीना संबंध आदिकनो पण त्यां संनव ढे ॥ अथवा निरंतर शास्त्रनो अभ्यास तथा गणवुं ए आदिकने विषे तत्पर एवा मुनिने ते उद्यान संबंधी दोष म थाउ तो पण लोकना संचारथी रहित ते उद्यान नूमिने विषे रहेता जे मुनि तेमनां उपकरण पण नील चोर आदिक आवीने हरशे एवो संनव ढे माटे ते ज्यारे उपकरण गयां त्यारे शरीरनी तथा संयमनी विराधना थवानो प्रसंग प्राप्त थाय ए हेतु माटे मुनिने उद्यानमां रहेवुं घटतुं नथी.

टीकाः—यनूद्यानवास आगमे श्रूयते सोऽनापातासंलोकगु-
सैकद्वारोद्यानविषयस्तस्य च प्रायेण कलिकाले लोकस्य राज-
चौरचरटाद्युपप्लवैर्बाधितत्वेन दौस्थ्यादसंभव एवेत्युद्यान-
वासः ! कथमधुनातनमुनीनां कल्प्यमानः शोभते ? तस्मा-
दिदानीं जिनगृहवास एव साधूनां संगतः प्रतिभाति.

अर्थः—ने जे उद्यानवास आगममां संभलाय छे ते तो जेमां
लोकनो आवरो न होय गुप्त एक द्वार होय. एवा उद्यानमां यतिने
रहेवुं एवो शास्त्रनो अभिप्राय छे ने बहुधा तो ते प्रकारना उपद्रवे
करीने लोक दुःखित थया छे. तथा दरिद्रि थया छे, माटे संभवतुज
नथी. तेथी आ कालना मुनिने उद्यानवास कल्पे एवुं जे कहेवुं ते
केम शोभे ? नज शोभे. माटे आ कालमांना साधुने चैत्यमांज र-
हेवुं ए पक्ष सारो घटतो जणाय छे.

टीकाः—न च तत्र आधाकर्मिकादयो दोषाः ॥ तथ च प्र-
योगः ॥ चैत्यमिदानींतनमुनीनामुपभोगयोग्यं ॥ आधाकर्मा-
दिदोषरहितत्वात् ॥ तथाविधाहारवत् ॥ नचायमसिद्धो हेतुः
॥ जिनप्रतिमार्थं निष्पादित आयतने आधाकर्मादिदोषानव-
काशात् ॥ यत्यर्थं क्रियमाणे हि तस्मिन्स स्यात् ॥

अर्थः—ने त्यां आधा कर्मिआदि दोष पण जणाता नथी ने
वली अनुमान प्रयोगथी ए वात सिद्ध थाय छे ॥ ते उपर न्याय-
शास्त्र विचार जे चैत्य आ कालना मुनिने उपभोग करवा यो-
ग्य छे, आधाकर्मादि दोष रहित छे ए हेतु माटे जेम आधाकर्मादि
दोष रहित आहार मुनिने भोगववा योग्य छे, तेम चैत्य पण आ
कालना मुनिने भोगववा योग्य छे ॥ पण आ हेतु असिद्ध नथी

केम जे जिन प्रतिमाने अर्थे निपजावेला स्थानकमां आधाकर्मादि दोषने पेसवानो अवकाश पण नथी माटे अनुमान निर्बाध छे, केम जे मुनिने अर्थे कर्युं होय तो तेमां ते आधाकर्मादि दोष होय ने आ तो मुनिने अर्थे कर्युं नथी माटे आधाकर्मी दोष नथी.

टीकाः—तथागमोक्तत्वमप्यस्यास्ति ॥ तथा चागमः ॥ "निस्सकडमनिस्सकडे" वावि चेइए सव्वहिं थुई तिन्नि॥वेलं व चेइयाणि व नाउंइक्किक्किया" वि ॥

अर्थः—तेमज आगममां कह्युं छे जे निश्राकृत तथा अनिश्राकृत ए सर्वे चैत्योमां त्रण थुइ देवी बाकी असुर थती होय अथवा झाझा चैत्यो होय तो एकएक थुइ पण अपाय छे.

टीकाः—॥ अत्र हि निश्राकृतव्यपदेशात् चैत्यवासः साधूनां सिध्यति ॥ अन्यथा यत्र साधूनां निश्रा तन्निश्राकृतमित्यन्वर्थानुपपत्तेः ॥ तन्निवासेनैव तन्निश्रायाः संभवात् ॥ यदि च साधूनां तत्र वासो न स्यात् तदाऽनिश्राकृतमेवैकं चैत्यं भवेत् ॥ अन्यस्य निश्राकृतपदवाच्यस्यानुपपत्तेः ॥

अर्थः—आ शास्त्र वचनमां निश्राकृत एवुं चैत्य एम कहेवापणुं छे, ए हेतु माटे साधुने चैत्यवास सिद्ध थयो. ने जो एम न कहीए तो जे साधुनी निश्राये कर्युं ते निश्राकृत कहीए ए प्रकारना साचा अर्थनी सिद्धि न थाय ए हेतु माटे साधुना निवासे करीनेज साधुनी निश्रानो संभव छे, ने जो साधुनो निवास चैत्यमां न होय तो अनिश्राकृत एवुं एकज चैत्य कहेत, माटे निश्राकृत पदवडे कहेलुं जे बीजुं चैत्य तेनी सिद्धी न थाय ए हेतु माटे साधुने चैत्यमां रहेवानुं सिद्ध थयुं.

टीकाः—तथाच निश्राकृतपदवाच्यस्य शशविषाणवदसा-नत्वेनानिश्राकृततुल्यकक्षतया तत्र वंदनाविधानमपि कथं घटा-मटाट्यते॥ तस्मात्तद्व्यपदेशान्यथानुपपत्त्यैव यतीनां तत्र वासो ऽवसीयते ॥

अर्थः—ने वली ससलानां शींगडानी पेठे वस्तुताये निश्रा-कृत चैत्यज नथी ने निकेवल अनिश्राकृत एवुं जे एक चैत्य छे, एम अंगिकार करो तो निश्राकृत चैत्यने विषे वंदननुं जे कहेवुं ते कीये प्रकारे घटशे, निश्राकृत चैत्यनो अंगीकार नहीं करोतो तेनुं कहेवुं व्यर्थ थशे माटेज निश्चय करीए छीए जे साधुने चैत्यमां रहेवानुं छे,

टीकाः—तथा संभावणे विसहो देउलियखरंटजयणवएसो इत्याद्यागमे ग्लानप्रतिजागरणचिंतायां देवकुलिकशब्दादपि चै-त्यवाससिद्धिः देवकुलिकनिवासमंतरेण देवकुलिकव्यपदेशा-नुपपत्तेः। नहि ग्रामाभावे सीमाविधानं नामेति लौकिकन्यायात्। एवं चैवमाद्यागमवचनप्रामाण्यादागमोक्तत्वमप्यस्येति निश्ची-यते ॥

अर्थः—वली संभावण इत्यादि आगम गाथाने विषे देवकु-लिक शब्द कह्यो छे, ते देवकुलिक शब्दथी पण चैत्यवासनी सिद्धि थाय छे, केम के देवकुल कहेतां देवालय ते जेमने छे ते देवकुलिक कहीए, एटले देवमंदिर वाला एटलो अर्थ थयो, देवमंदिरमां निवास कर्या विना देवमंदिरवालो एम कहेवुं न घटे ते उपर लौकिक न्याय देखाडे छे जेम के गाम विना सीमाडालुं करवुं ते निश्चे होय नहीं ए प्रकारना लौकिक न्यायथी चैत्य निवास कर्या विना चैत्यवाला अमुक पुरुषो एवो व्यवहार होय नहीं. एवं कहेतां ए प्रकारना

लौकिक न्यायथी तथा एवमादि केहेतां आ कह्युं इत्यादि आगम वचनना प्रमाणपणाथी ए चैत्यवासने आगमोक्तपणुं छे एम निश्चय करीए छीए.

टीका::तथा च प्रयोगः ॥ चैत्यनिवास इदानींतनमुनीनामुचित आगमोक्तत्वात् ॥ चैत्यवंदनवत् ॥ नन्वेवमपि सिद्धांतान्न साक्षात् चैत्यवासः सिद्ध्यति ॥ विधेयतया तस्य क्वचिदप्यनभिधानादिति चेत् । सत्यमेवं तर्हि गीतार्थाचरितत्वा दयमुपपत्स्यते ॥ तथाच साधूनां जिनभवनवासो विधेयः । गीतार्थाचरितत्वात् । चतुर्थ्यां पर्युषणापर्ववत् नचायमसिद्धो हेतुः ॥ गीतार्थाचरितत्वस्योभयत्रापि प्रतीतत्वात् ॥ तथाहि ॥ श्रीमदार्यरक्षितपादैर्भगवति महावीरे निःश्रेयससौधमध्यासीने गीतार्थानां बलमेधासंहननधैर्यादिहानिं पृष्टवंशादिसहितवसतिव्यवच्छेदं चोपलभ्य चैत्यवासो यतीनामाचरितः

अर्थः—ते उपर अनुमान प्रयोग करी देखाडे छे जे साधुये जिनभुवनमां वास करवो केम जे गीतार्थ पुरुषोए आचर्यो छे ए हेतु माटे चोथने विषे पर्युषणा पर्व करवानी पेठे. एटले जेम चोथने विषे गीतार्थ पुरुषे पर्युषणा पर्व कर्युं छे. ते साधुने करवा योग्य छे तेम चैत्यवास पण करवा योग्य छे, ने आ हेतु असिद्ध पण नथी केम जे गीतार्थ पुरुषे जे आचर्युं ते वादि प्रतिवादि ए बेने प्रसिद्ध पणे मानवा योग्य छे ॥ ते देखाडे छे जे भगवान् महावीर स्वामी मोक्षरूपी महेलमां पधार्या पछी श्री आर्यरक्षित आचार्ये गीतार्थ पुरुषनां बलबुद्धि, शरीरनां संघयण, धैर्य आदिकनी हानी जोइने

तथा लक्षण युक्त जे साधुने रहेवानां स्थान तेनो उच्छेद थयो एम जाणीने साधुने चैत्यवास कराव्यो छे.

टीकाः—कुत एतदवसितमिति चेत् ॥ आप्तोपदेशात् ॥ तथाहि ॥ छवालसएहिं वीसुत्तरेहिं, सिद्धिं गए महावीरे ॥ वुच्छिन्नं च जईणं, पि ठीवंसाइयं ठाणं ॥ बलमेहाबुद्धीणं, हाणिं नाऊण सुविहियजणस्स ॥ चेइयमठआवासो पकप्पिओ अज्जरक्खेहिं ॥

अर्थः—वली लिंगधारी सुविहित प्रत्ये बोल्यो जे, जो तमे एम कहेता हो जे क्यांथी ए वातनो निश्चय कर्यो? तो कहीए छीए जे हितकारी मोटा पुरुषना उपदेशथी ते देखाडीए छीए जे महावीर स्वामी सिद्धि गया पछी छसें ने वीश वर्ष थयां त्यारे यतिने रहेवा योग्य स्थानक उच्छिन थयां ने सुविहित जननां बल, बुद्धि, अने मेधानी हानि थई ते जाणीने आर्यरक्षित आचार्यें चैत्यमां निवास कल्प्यो छे.

टीकाः—न चागमाविरोधिन्याचरणा प्रमाणं, इयं तु न तथेति वाच्यं आगमाविरोधस्य निस्सकडेत्यादिना समर्थितत्वात् ॥ गीतार्थाचरणा चागमं प्रमाणयद्भिरवश्यमभ्युपेतव्या ॥ यदुक्तं ॥ अवलंबिऊण कज्जं, जंकिंची आयरंति गीयत्था ॥ थोवावराहवहुगुण, सव्वेसिं तं पमाणंति

अर्थः—वली लिंगधारी सुविहित प्रत्ये कहे छे जे जो तमे एम कहेता हो जे आगमने विरोध न आवे एवुं आचरण प्रमाण छे अने आतो तेवी रीते नथी माटे प्रमाण नथी तो तेनो उत्तर

जे आगमनी साथे विरोध नथी ए प्रकारे निस्सकरू इत्यादि शास्त्र वचने करीने आगम साथे मलतो चैत्यवास छे एवुं प्रतिपादन पूर्वे कर्युं छे ने गीतार्थनुं आचरण आगमने प्रमाण करनार पुरुषने अवश्य प्रमाण करवा योग्य छे. जे माटे शास्त्रमां कह्युं छे जे गीतार्थ जनो ज्ञानादिरूप कार्यनुं आलंबन करीने जे कांइ पण कार्य करे छे. तेमां थोरुो अपराध अने घणो गुण रह्यो छे माटे ते सर्वने प्रमाणरूप छे.

टीकाः—इति जगवत्प्रतिपादितमुमुक्षुप्रवृत्तिनिवृत्तिरूपागमश्रुतादिव्यवहारपचंकांतःपात्यागमविरुद्धाचरणानज्युपगमे च जगवदप्रामाण्यसंजनात् ॥ तथाच जगवदाशातनाप्रसंगात्

अर्थः—ए हेतु माटे जगवाने प्रतिपादन कर्या जे मुमुक्षुने प्रवृत्ति निवृति रूप आगम श्रुतादि रूप पांच व्यवहार तेमांनुं आगमथी अविरोध आवे एवुं जे आचरण तेनो अंगीकार नहीं करो तो जगवानने पण अप्रमाणपणानी प्राप्ति थशे माटे, वली जगवानना आशातना थवानो प्रसंग थशे ए हेतु माटे

टीकाः—आचरितलक्षणस्येहोपपत्तेः ॥ तथा चागमः ॥ असढेण समाइन्नं जं कथ्थई केणई असावज्जं न निवारियमन्नेहिं, बहुगुणमणुमेयमायरियं

अर्थः—शिष्ट पुरुषे जे आचरण कर्युं ते आचरण लक्षणनी अहींआं सिद्धि छे, एटले शिष्ट पुरुषना सरखुं आचरण करवुं ते युक्त छे, ते उपर शास्त्रनुं प्रमाण छे, जे शठजाव विनाना जे पापरहित मोटा पुरुष तेमणे ज्यां जे कंइक आचरण कर्युं ते निर्दोष छे

माटे वीजाए द्रव्य क्षेत्र काल ज्ञावना अनुमाननी अपेक्षाये घणो गुण जाणी निवारण कर्युं नथी तो ते आचरण कल्पे ठे, एटले करवा योग्य ठे.

टीकाः—अयं च न तावच्छठैः समाचीर्णो, द्रव्यक्षेत्रकालाद्यपेक्षया गुरुलाघवचिंतया धार्मिकैरेवास्य प्रवर्त्तितत्वात् ॥ नाप्ययं सावद्यः सावद्यं हि पापं,तच्च जीववधादि ॥ नच यतीनां चैत्यवासविधौ जीववधादिकं प्रयत्नेनान्वेषयंतोऽप्युपलज्ञेमहि ॥ निरवद्यत्वादेवं च न वहुश्रुतैस्तत्कालज्ञाविज्ञिर्गीतार्थैर्निवारितः अत एव वहूनां धार्मिकाणामनुमतः ॥

अर्थः—ने आ जे चैत्यवास ठे ते शठ पुरुषोए आचर्यो नथी ए तो द्रव्य क्षेत्र कालादिकनी अपेक्षाये गुरु लाघवना विचारथी एटले दोष थोमो ने गुण घणो एवा विचारथी धार्मिक पुरुषोयेज ए चैत्यवासनी प्रवृत्ति करी ठे, ए हेतु माटे, वली आ चैत्यवास ठे ते सावद्य पण नथी केमजे अवद्य जे पाप तेतो जीववधादिक ठे, ने मुनिने चैत्यवास करतां कांइ जीव वधादिक पाप प्रयत्नथी खोलतां पण नथी जमतुं, माटे ए चैत्यवास निरवद्य ठे ए हेतु माटेज ते काले थएला वहुश्रुत गीतार्थ पुरुषोए निवारण कर्यो नथी ने एहीज कारण माटे धार्मिक पुरुषोने चैत्यवास करवानो संमत ठे.

टीकाः—सिद्धांतनिकषपट्टानां विरचितानेकश्रुतोद्धारसारशास्त्राणां श्रीहरिज्ञद्रसूरीणां तथाप्रवृत्तिश्रवणात् ॥ स्वरचितग्रंथेषु चैत्यवासप्रतिपादनेन च तथाप्रवृत्तेस्तैः सत्थापनात् ॥ ॥ तथाच तद्ग्रंथः ॥ जिणबिंबपइठत्थं, अहवा तक्कम्मतुल्लति ॥ तया जिणबिंबस्स पइठा साहुनिवासो य इत्यादि ॥

अर्थः—अने सिद्धांतनी कसोटी समान, अने रच्यां छे अनेक आगमना उद्धारथी श्रेष्ट शास्त्र जेणे एवा श्री हरिभद्र सूरी तेमनी प्रवृत्ति संभलाय छे जे हरिभद्रसूरिए चैत्यवास कर्यो हतो केम जे पोताना रचेला ग्रंथोने विषे चैत्यवासनुं प्रतिपादन करवुं तेणे करीने चैत्यवासनी प्रवृत्ति छे ते तेमणे जे सत्य थापी छे ए हेतु माटे चैत्यवास करवो वली आ तेमना ग्रंथनुं वचन छे, जे जिनबिंबनी प्रतिष्ठाने अर्थे अथवा जिन कर्मतुल्य, तथा जिनबिंबनी प्रतिष्ठा छे त्यां साधु निवास छे इत्यादि—

टीकाः—देयं तु न साधुभ्यस्तिष्ठंति यथा च ते तथा कार्यं॥ अक्षयनीव्या ह्येवं, ज्ञेयमिदं वंशतरकांडमिति

अर्थः—चैत्य साधुने आपी न देवुं, जेवी रीते ते साधु रहे तेम करवुं अक्षय नीवीये करीने एटले मूल धननो नाश न थवा देवो, ए प्रकारे जे करवुं ते वंशतरकांड जाणवुं एटले वंश परंपराए चाल्युं जाय.

टीकाः—तथा समरादित्यकथायामपि जिनभवनांतर्गतप्रतिश्रयस्थितायाः साध्व्याः केवलोत्पादप्रतिपादनात् ॥ तथाधुनिकमुनीनां बहूनां चैत्यवासप्रवृत्तिदर्शनात् ॥ यदि ह्ययं गीतार्थानां नानुमतः स्यात्तदा कथमेकवाक्यतया सर्वत्राऽप्रतिहतप्रसरः प्रवर्त्तते

अर्थः—वली समरादित्यनी कथामां पण जिनभवनना अंतर्गत जे प्रतिश्रय तेमां रहेली जे साध्वी तेने केवलज्ञान उत्पन्न थयुं छे एम प्रतिपादन कर्युं छे ए हेतु माटे. वली आधुनिक घणा

मुनि चैत्यवास करे छे तेनी प्रवृत्तिनुं देखवापणुं छे माटे. जो ए चैत्यवास गीतार्थोने संमत न होत तो केम एक वाक्यपणे सर्व जगाये निरंतर तेमनो पत्तार प्रवर्त्ते छे ? एटले जो चैत्यवास नज करवानो होत तो सर्वे गीतार्थोनुं वचन तथा प्रवर्त्तवुं ते एक साथे मलतुं केम आवत ?

टीकाः--न च विशेषदोषोपलंजमंतरेण गीतार्थाचरितम-प्रमाणीकर्त्तुं युक्तं ॥ नापि विरुद्धः साध्यविपर्ययाव्यासत्वात् ॥ नहि गीतार्थाचरितत्वं यत्यविधेयत्वेन व्यासं ॥ तथासति पर्युषणाया अपि चतुर्थ्यामकरणप्रसंगात् ॥ नाप्यनैकांतिकः विपक्षेऽगतत्वात् ॥ नहि गीतार्थाचरितत्वं यत्यविधेयेप्यनुष्ठाने गतं ॥ प्राणातिपातादीनामपि गीतार्थाचरितत्वेन हि तत् स्यात् ॥ न चैवमस्ति

अर्थः--माटे विशेष दोषनी प्राप्ति विना गीतार्थ पुरुषनुं आचरण अप्रमाण करवुं ते युक्त नथी. ते उपर न्याय शास्त्रनो विचार जे, चैत्यवास साधुने करवा योग्य छे. गीतार्थ पुरुष आचरण कर्यो ए हेतु माटे ए प्रकारना अनुमान प्रयोगने विषे जे हेतु छे ते विरुद्ध नथी एटले खोटो नथी केम जे साधुने न करवा योग्य जे वस्तु तेमां गीतार्थना आचरण रूप जे हेतु ते होय नहीं माटे जे गीतार्थनुं आचरण छे ते साधुने करवा योग्य छे, ने जो एम न मानता हो तो चोथने विषे पर्युषणा पर्व करो छो तेने न करवानो प्रसंग प्राप्त थशे. वली अनुमान प्रयोगने विषे जे हेतु छे ते एकांतिकपण नथी एटले खोटो नथी केम जे यतिने न करवा योग्य जे अनुष्ठान मात्र ते रूप जे विपक्ष तेने विषे गीतार्थाचरणरूप जे हेतु ते छे

नही माटे, ने जो प्राणातिपातादिकनुं गीतार्थ आचरण करता होत तो ए हेतु विपक्षमां गयो कहेवात, माटे एम तो छे नहीं, तेथी अनुमान प्रयोग निर्दोष सिद्ध थयो.

टीकाः— ॥ किंच, यतीनां चैत्यवासमंतरेण सांप्रतिकजिनभवनानां हानिः स्यात् ॥ तथाहि ॥ पूर्वं कालानुभावादेव श्रीमंतोऽव्यग्रचेतसो देवगुरुतत्वप्रतिपत्तिभरनिर्भरतया ह्येतदेव परं तत्व मिति मन्यमानाः श्रावकाश्चैत्यचिंत्याचिंतां परमादरेणाऽकरिष्यन् ॥ सांप्रतं तु दुःषमादोषा न्नक्तंदिवं कुटुंबसंबलचिंतासंतापजर्जरितचित्ततयेतस्ततो धावतां प्रायेण दुर्गतानां श्राद्धानां स्वभवनेप्यागमनं दुर्लभमास्तां जिनमंदिरे तथाच कुतस्त्या तत्समारचनादिचिंता तेषां

अर्थः—वली यतिने चैत्यवासविना आ कालनां जिनभवननी हानि थाय. तेज देखाडे छे जे पूर्वे कालना महिमाथीज जे श्रीमंत लोक हता ते व्यग्र चित्तवाला न हता.ने देवगुरु तत्वनी घणी भक्तियो भरेला हता, ने ते देवगुरुने एज परमतत्व छे एम मानता एवा जे श्रावक ते चैत्य संबंधी चिंताने परम आदरवडे करता ने हालमां तो दुःखमा कालना दोषथी रात्रि दिवस कुटुंबनुं भरणपोषण करवानी चिंताना संतापथी आकुल व्याकुल चित्तवाला थया छे. ए हेतु माटे चारे पास दोडता ने बहुधा दरिद्रि एवा श्रावक लोकोने पोताने घेर पण आववुं दुर्लभ छे तो जिनमंदिरे आववानी वाततो छेटे रही, माटे ते जिनमंदिरने समारवुं इत्यादिक चिंता तो तेमने क्यांथीज होय ?

टीकाः—श्रीमतां तु प्रतिक्षणमदालसवारविलासिनीप्रमु-

सारशबलमलयजरसपंकिलपीनकुचकलशपीठलुठनडुर्ललिता-नां निरंतरमेव नूरिनूरिद्विप्सया पार्थिवसेवाहेवाकिनां जिन-गृहावलोकनमेव न संपद्यते, दूरे तच्चिंता ॥ तदन्नावे च कालेन जिनसदनानां विशरारुता स्यात् ॥ तथाचतीर्थोच्छित्तिरापनी-पद्यते

अर्थः—आ कालना श्रीमंत श्रावक लोकोने तो ते चैत्य चिंता क्यांथीज होय ? केम जे ते तो रूपे करी पोताना रूपादिक गुणनी केफे करीने आलसु एवी जे वेश्याओ तेमना बरास कर्पुर-वती मिश्रित जे मलयचंदननो रस तेणे करीने व्याप्त थएला अने पुष्ट थएला जे स्तन कलश ते रूपी पीठने विषे लोट पोट थता एटले केवल विषय शक्ति छे ने ते धर्म कार्य नथी करी शकता तेथी दरिद्री जेवा छे. ने केटलाकने तो निरंतरज घणी घणी द्रव्य पामवानी इच्छाये करीने राजाओनी सेवा करवानी कुटेव पमी छे. एवा ते गृहस्थ श्रीमंत लोकोने जिन नवननुं देखवुंज नथी थतुं; तो तेनी चिंता तो छेटे रही ने ज्यारे ते जिनन्नवननी चिंता न रही त्यारे सार संन्नाल विना काले करीने जिन न्नवननो विनाश थाय ने ज्यारे जिनन्नवननो विछेद थयो त्यारे तीर्थनो विछेद एनी मेलेज आवी पड्यो एम जाणवुं.

टीकाः—चैत्यांतर्वासे तु यतीनां तदुद्यमेन नूरिकालं जिन-न्नवनान्यवतिष्ठेरन् ॥ तथा च तीर्थाव्यवच्छेदः ॥ तदव्यवच्छि-त्तिहेतोश्च किंचिदपवादासेवनस्यागमेपि समर्थनात् ॥ यदाह ॥ जो जेण गुणेण हिओ, जेण विणा वा नसिज्झए जंतु इत्यादि। तदेवं सूक्ष्मेक्षिकया विमृश्यतां विदुषां चेतसि चैत्यवास एवै-दानींतनमुनीनां संगतिमंगतीति.

अर्थः—ने ज्यारे मुनि चैत्यवास करे त्यारे तो मुनिनो ते संबंधि जे उद्यम तेणे करीने जिनभुवन घणा काल सुधी रहे त्यारे तीर्थनो पण उच्छेद न थाय माटे तीर्थनो उच्छेद न थाय ए हेतु माटे कांइक अपवाद सेववानुं शास्त्रमां पण कह्युं छे जे जे गुणे करीने अधिक होय अथवा जेना विना जे सिद्ध न थाय इत्यादि. ते माटे सूक्ष्म दृष्टिए विचार करो तो विद्वानना चित्तमां एम आवशे जे आ कालना मुनिने चैत्यवास करवोज जोइए.

टीकाः—तथा वसत्यक्षमेति ॥ वसतौ परगृहे निवासं प्रति अक्षमा मात्सर्यं परगृहवासोऽग्रे निराकरिष्यत इति यदुक्तं, तदिदानीं व्यज्यते ॥ सर्वव्रतेषु निरपवादं हि ब्रह्मव्रतं यतीनामागमे गीयते, यदुक्तं ॥ न वि किंचि अणुन्नायं, पडिसिद्धं वा वि जिणवरिंदेहिं ॥ मुत्तुं मेहुणभावं, न सो विणा रागदोसेहिं ॥ नच तत् स्त्रीशब्दश्रवणादेः सम्यक् निर्वोढुं पार्यते ॥ उत्कलिकादिप्रादुर्भावात् ॥ परगृहे वसतां चावश्यंभाविनः तच्छ्रवणादयः ॥

अर्थः—वली ते लिंगधारी आ प्रकारनी प्ररूपणा करे छे जे वसति एटले परघर तेमां जे रहेवुं ते प्रत्ये मत्सर करवो एटले मुनिने परघरमां न रहेवुं ए रीते ते प्रतिपादन करे छे. पूर्वे एम कह्युं हतुं जे परघरमां रहेवानुं आगल खंडन करीशुं ते आ खंडन करी प्रगट करे छे. जे सर्व व्रतमां साधुने जेमां अपवाद मार्ग नथी एवुं तो एक ब्रह्मव्रत आगममां कह्युं छे, ते शास्त्रवचन ए छे जे जे जिनवरेंद्र तीर्थंकरे एक मैथुन भाव मूकीने बीजुं कांइ पण आज्ञा कर्युं नथी. तथा निषेध पण कर्युं नथी. केम जे ते मैथुन राग विना

होय नहीं एटले रागनी जोके द्वेष पण आव्यो. ने ते पछवाडे सर्वे दोष आव्या माटे, ते ब्रह्मव्रत स्त्रीयोना शब्दो सांभलवा तथा तेने देखवी इत्यादिकथी सारी रीते निर्वाह करी पार पमातु नथी, केम जे कामोद्दीपन आदी प्रगट थवानुं ए कारण छे माटे, ने पर-घरमां रहेनाराने ते श्रवणादिक अवश्य थाय छे.

टीका:—॥ तथाच नितंबिनीनां तुलितकोकिलाकलकूजितं गीतादिरवमधरितरतिसौंदर्यं च रूपमुपलभ्य भुक्तभोगानां पूर्वानुभूतनिधुवनविलसितप्रतिसंधानादयोऽभुक्तभोगानां च तत्कुतूहलादयः प्राडुर्भवेयुः ॥

अर्थ:—वली स्त्रीयोनो कोयलना मधुर शब्द जेवो गीतादि-कनो शब्द सांभलीने तथा कामदेवनी स्त्री तेनुं सुंदरपणुं ते जेणे लघुता पमाड्युं छे. एवुं स्त्रीयोनुं रूप देखीने पूर्वे गृहस्थावस्थामां जेणे भोग भोगव्या छे. ते साधुने पूर्वे अनुभव थएलो जे मैथुन-विलास तेनुं अनुसंधान थवुं एटले स्मरण थवुं इत्यादि घणा दोष प्रगट थाय ने जे साधुये पूर्वे गृहस्थावस्थामां भोग भोगव्या नथी. तेने ते मैथुननुं कौतुक थवारूप घणा दोष प्रगट थाय.

टीका:—यतिनां च सततं कर्णपीयूषवर्षिविशदगंभीरम-धुरस्वाध्यायध्वानं निशम्य केषांचित्तु शरीराण्यगण्यलावण्यश्री-णि निर्वर्ण्य प्रोषितपतिकादीनां तरुणीनां रिरंसादयः प्राडुःष्युः॥ एवं चान्योन्यं निरंतररूपावलोकनगीतश्रवणादिभिर्दुर्मथमन्म-थोन्माथदौस्थ्यचारित्रमोषादयोऽनेकदोषाः पुष्येयुः ॥

अर्थ:—ने साधुनो निरंतर कानने अमृत समान जे सुंदर

मधुर स्वाध्यायनो शब्द तेने सांजलीने तथा केटलाक साधुनां असंख्य लावण्य शोजानां धारण करनार सुंदर शरीर तेमने देखी-ने विरहिणी जुवान स्त्रीयोने काम क्रीमा करवानी इच्छा थाय ए आदि घणा दोष प्रगट थाय. ए प्रकारे स्त्रीयोने तथा साधुने पर-स्पर निरंतर रूपनुं देखवुं गीतनुं सांजलवुं ए आदि कारणे करीने दुःखदायी महा कामदेव संबंधी विकारे करीने चारित्रनो नाश थाय ए आदि घणा दोष प्रगट थाय माटे साधुए परघरमां निवास न करवो.

टीकाः—॥ यथोक्तं ॥ थीवज्जियं वियाणह इत्थीणं जथ्थ काणरूवाणि ॥ सद्दा य न सुच्चंती, ताविय तेसिं न पेच्छेहि ॥ बंज्ञ-वयस्स अगुत्ती, लज्जानासो य पीइवुड्ढी य ॥ साधु तवोवणवासो, निवारणा तिथ्थ परिहाणी

अर्थः—ते शास्त्रमां कह्युं छे जे साधुने रहेवानुं स्थान स्त्री वर्जित जाणवुं जे स्थाने स्त्रीयोनां रूप तथा शब्द न देखाय न सं-जलाय तथा ते स्त्रीउ पण ते साधुने न देखे एवुं स्थान साधुने रहेवा योग्य छे केम जे एवी रीते न होय तो ब्रह्मव्रतनी गुप्ति न रहे तथा लज्जानो नाश थाय तथा प्रीतिनी वृद्धि थाय, माटे सा-धुने तपोवनमां निवास करवो जेथी तीर्थनी हानिनुं निवारण थाय.

टीकाः—तथा लौकिका अप्याहुः ॥ शृणु हृदयरहस्यं य त्प्रशस्यं मुनीनां, न खलु न खलु योषित्संनिधिः संविधेयः॥ हरति हि हरिणाक्षी क्षिप्रमक्षिक्षुरप्रप्रहतशमतनुत्रं चित्तमप्युन्नतानां.

अर्थः—लौकिकमां पण एम कहे छे जे, मुनिने पण वखा-

णवा योग्य एवुं हृदयनुं रहस्य कहुं छुं ते सांभळो जे साधुने स्त्रि-
ओनुं समीपपणुं निश्चे तज करवुं. केम जे हरिणना जेवां जेनां नेत्र
छे एवी स्त्री नेत्ररूपी तीखा शस्त्रना प्रहारवडे उपशमरूप बखतरनो
नाश करे छे ने उत्तम पुरूषनां पण मन हरे छे.

टीकाः—अत एव निशीथे पंचमोद्देशके एक्कद मूलगुणेसुं
अविसुद्धा इत्थि सारिया बीया ॥ तुल्लारोवणवसही, कारणि
तहि कत्थ वसियव्वं ॥ अत्र तुल्लारोवणत्ति ॥ उत्सर्गेणोभयोरपि
वसत्योर्वासे तुल्यं प्रायश्चित्तमित्यर्थः ॥ अथापवादे क्व वस्त-
व्यमितिप्रश्ने ॥ अहवा गुरुस्स दोसा, कम्मे इयरीय हुंति स-
व्वेसिं ॥ जइ ण तवोवणवासं, वसंति लोगे अ परिवाउ ॥

अर्थः—एज हेतु माटे निशीथने विषे पांचमा उद्देशामां
कह्युं छे जे एक निवास तो मूल गुणने शुद्ध राखे एवो नथी ने
बीजो निवास स्त्री संसक्तिवाळो छे, माटे ए बेमां निवास करतां
तुल्य प्रायश्चित्त छे, कारण पडे त्यारे ते बेमांथी कीयामां रहेवुं, ए
जग्याए तुल्लारोवण ए शब्दनो अर्थ टीकाकार कहे छे जे उत्सर्ग
मार्गे बे ए निवासने विषे रहेनारने पण तुल्य प्रायश्चित छे. अथ
अपवाद मार्गे क्यां रहेवुं एम शिष्ये प्रश्न कर्युं त्यारे गुरु कहे छे जे

टीकाः—अत्र इतरस्यां स्त्रीसंसक्तायां वसतौ वासे प्रागनु-
भूतविलसितस्मृतिकरणादिना चतुर्थव्रतभंगप्रसंगेनाऽन्यशुद्ध-
वसत्यलाभेन च यतीनामाधाकर्मिक्यपि वसतिरनुज्ञाता
ग्रामाद्यंतर्वसद्भिश्च स्त्रीसंसक्तिवियुता श्रुतोक्तनिखिलगुणयुता
दुरापा वसतिः ॥ अंतत स्त्रीशब्दश्रवणस्यापि संभवात् ॥

अर्थः—आ जगाये बीजो स्त्री संसक्त निवासने विषे जो साधु निवास करे तो पूर्वे गृहस्थपणामां स्त्री साथे अनुभव करेलो जे विलास तेनुं स्मरण थवुं इत्यादिके करीने चोथा व्रतना भंगनो प्रसंग थाय तेणे करीने, ने बीजो शुद्ध निवासनो लाभ न थाय तेथी यतिने आधाकर्मिक निवास तेनी आज्ञा करेली छे. ने ग्रामादिमां रहेनारने तो स्त्री संबंध रहितने शास्त्रमां कहेला जे सर्व गुण तेणे सहित एवो निवास मळवो दुर्लभ छे, केम जे घरना अंदरमां तो स्त्रीयोना शब्द सांभळवानो संभव छे ए हेतु माटे महासाधुए परघर वास न करवो.

टीका:—जिनगृहवासे तु यतीनां न तथासंसक्तिसंभवः, चैत्यवंदनार्थमेव क्षणमात्रमागत्य गंत्रीणां श्राविकादीनां यतिभिः सह तथाविधप्रसंगानुपपत्तेः ॥ नच एक्का मूलगुणेसुमित्याद्यागमबलेन प्रत्युत स्त्रीसंसक्तवसतित्यागेनाधाकर्मिकवसतिवासो यतीनां संगतो, न तु जिनगृहवास इतिवाच्यं॥ आधाकर्मस्त्रीसंसक्त्यादिदोषजालरहितजिनगृहवासलाभ आधाकर्मवसतिवासस्यात्यंतमनुचितत्वात् ॥

अर्थः—जिन घरमां निवास करे त्यारे तो यतिने ते प्रकारना स्त्री संबंधनो संभव नथी केम जे चैत्यवंदनने अर्थेज क्षण मात्र आवीने जनारी एवी श्राविकादिक साथे यतिने ते प्रकारनो प्रसंग नथी थतो जेवो तेना घरमां रहे थाय छे तेवो वळी "एक्का मूलगुणेसु" इत्यादि आगमना बळे करीने उलटो स्त्री संबंधरहित निवासनो त्याग करवो तेणे करीने आधाकर्मिक निवास साधुने करवानो संभव्यो, पण जिनघरमां रहेवानुं संभव्युं नहीं. ए प्रकारे

जो तमे कहेता हो तो ते न कहेवुं केम जे आधाकर्मिक तथा स्त्री संबंध जेमां छे इत्यादि दोष समूह रहित जे जिन घर निवास तेनो लाभ थये छते आधाकर्मिक निवास करवो ते अत्यंत अघटतोज छे. ॥

टीकाः–को ह्युन्मत्तः पथ्याशनावाप्तावपथ्यमश्नीयात् ॥ तस्मात्परगृहवसतिरसमीचीनाऽधुनातनयतीनां य स्त्वागमे परग्रहवासः श्रूयते स तात्कालिकातिसात्विकयत्यपेक्षयेति ॥ तथा च प्रयोगः॥ यतीनां परग्रहवासोऽनुपपन्नः ॥ अनेक दोष दुष्टत्वात् प्राणातिपात वदिति ॥

अर्थः–केम जे कोण उन्मत्त पुरूष पथ्य भोजननी प्राप्ति थये छते अपथ्य भोजन जमे ते माटे आ कालना मुनियोने परघरमां निवास करवो ते ठीक नहीं, ने जे आगममां परघर निवास करवो एम संभळाय छे, ते तो ते कालना अति सात्विक धीरजवाळा जे मुनि, तेनी अपेक्षाए छे, वली ते उपर अनुमान प्रयोग पण सिद्ध थाय छे जे यतियोने परघरमां रहेवुं ते अघटित छे. केम जे ते अनेक दोषे करीने दुष्ट छे ए हेतु माटे प्राणातिपातनी पेठे जेम प्राणातिपात छे ते अनेक दोष दुष्ट छे तो यतिने करवा योग्य नथी, तेम परघर वास पण करवा योग्य नथी.

टीकाः–तथा स्वीकारः स्वसत्तापादनं केचित्स्याह ॥ अर्थो द्रविणं गृहस्थः श्रावकः चैत्यसदनं जिनायतनं ॥ ततोर्थश्चेत्यादि द्वंद्वः तेषु ॥ तत्र द्रव्यस्वीकारस्यागमे निषिद्धत्वेऽपि सांप्रतिकयतीनां तत्स्वीकारो युक्तः ॥ तमंतरेण ग्लानपरचक्रदुर्भिक्षाद्यवस्थायां भैषज्यपथ्याद्यनुपपत्तेः॥तद्भिना च धर्म-

शरीरस्याभावप्रसंगात् ॥ गृहमेधिनां च प्रायेण कालदोषान्निर्धर्मत्वेन च यतिचिंताद्यविधानात् ॥

अर्थः—वली ते वेषधारी सुविहित प्रत्ये बोले छे जे द्रव्य तथा गृहस्थ तथा जिनमंदिर ते पोतानां करी राखवां तेमां द्रव्यनो अंगिकार करवो तेनो शास्त्रमां निषेध छे तो पण आ कालना साधुने ते द्रव्यनो अंगिकार करवो ते युक्त छे केम जे ते द्रव्य विना ग्लान अवस्थामां तथा परचक्रनो भय थाय तथा दुकाल पडे इत्यादि अवस्थामां औषध तथा पथ्य भोजन इत्यादिकनी प्राप्ति न थाय ए हेतु माटे ने ते विना धर्म शरीरने नाश थवानो प्रसंग थाय ए हेतु माटे ने गृहस्थ तो वहुधा काल दोषे करीने धर्म रहित थया तेणे करीने यतिनी चिंतादिकने करता नथी माटे ॥

टीकाः—तथा सांप्रतं चैत्यद्रव्यमपि यतिभिः स्वीकृत्य वर्द्धनीयं मूलधनं रक्षद्भिस्तै वृद्ध्यादेरधिकीभवता द्रव्येण प्रवचनाव्यवच्छित्तये दुर्बलश्राद्धानामुद्धारकरणात् ॥ तेषां च तथादौर्गत्यपंकादुद्धृतानां कालेनानवरतचैत्यसपर्याचिंतादिना तीर्थप्रभावनया वहुतरपुण्यार्जनसंभवात् ॥ तदुद्धारं विना तु प्रवचनोच्छेदप्रसंगात् ॥ इत्यर्थस्वीकारोऽधुनातनमुनीनां संगत इवाभातीति ॥ ४ ॥

अर्थः—वली सांप्रतकाले यतियोने चैत्यद्रव्यनो अंगिकार करी वधारवुं जोइये. केम जे मूल द्रव्यनी रक्षा करी वृद्ध्यादिकथी अधिक थतु जे ते द्रव्य तेणे करीने प्रवचननो उच्छेद न थाय तेने अर्थे ने दुर्बल श्रावकनो पण उद्धार कराय ए हेतु माटे. ने ज्यारे दरिद्रतारूपी कादवथी ते श्रावकनो उद्धार कर्यो त्यारे काले

करीने निरंतर चैत्यनी पूजा अर्चादिक चिंताये करीने तथा तीर्थ-
नी प्रन्नावनाये करीने अतिशे पुण्य उपार्जन करवानो संन्नव ढे ए
हेतु माटे, ने ते श्रावकनो उद्धार कर्या विना तो प्रवचननो उच्छेद
थवानो प्रसंग ढे ए हेतु माटे द्रव्यनो अंगीकार ते तो आधुनिक
मुनिने संगत ढे, एटले करवो घटतो होय ने शुं ! एम जणाय ढे.

टीकाः—तथा श्रावकस्वीकारोप्यद्यतनमुनीना मुत्सर्गाप-
वादपदवीविदुराणां न निर्युक्तिकः॥ पूर्वं हि कालस्य सौस्थ्या-
दतिशयवत्पुरूषबाहुल्यात् कुतीर्थ्यानामल्पीयस्त्वात् लोक-
स्य प्रायेणासंक्लिष्टत्वात् च जैनमतबाह्या अपि जनाः सितांब-
रन्निक्षुन्यः सबहुमानं न्निक्षादिकं व्यतरिष्यन्॥ सांप्रतं तु
प्रादुर्न्नवद्भूरिकुतीर्थिकसार्थकुमतकदर्थितांतकरणतया जैनमा-
र्गवैमुख्येन तेषां तथाविधश्वेतांबरदीक्षाया अन्नावात्॥ अतः
श्राद्धस्वीकारं विना न्निक्षावाप्तेरनुपपत्तेः युक्तं संप्रति त-
त्स्वीकारः॥

अर्थः—वली ते लिंगधारी सुविहित प्रत्ये बोले ढे जे आ
कालना उत्सर्ग अपवाद मार्गना जाणनार मुनिने पोताना श्रावक
करी राखवा ते युक्त ढे॥ केम जे पूर्वे तो काल सारो हतो ने
अतिशयशाली घणा मोटा पुरूष हता ने कुतीर्थिक घणा उंडा
हता. ने लोक पण प्राये सारा हता ए हेतु माटे जैनमत विनाना
पण लोक श्वेतांबर साधुने बहु मान सहित न्निक्षादिक आपता
अने आ कालमां तो प्रगट थयो जे घणो कुतीर्थिकनो समूह तेनो
जे कुमत तेणे करीने कदर्थना पाम्यां जे अंतःकरण ते हेतु माटे
तेमने ते प्रकारे श्वेतांबर साधुने आपवानी इच्छानो पण अन्नाव

छे. ए हेतु माटे पोताना श्रावक न करी राख्या होय तो भिक्षा-नी प्राप्ति पण न थाय माटे आ कालमां श्रावकनो अंगीकार करवो ते युक्त छे.

टीकाः—तथा आगमेपि ॥ जा जस्स ठिई जा जस्स संठिई, पुव्वपुरिसकया मेरा ॥ सो तं अइक्कमंतो, अणंतसंसारिओ होइ इत्यादिना स्वीकृतगुरुपरिहारेणापरगुरोरंगीकारः श्रावकाणामनंतसंसारित्वायेतिपतिपादनेनास्यार्थस्याभ्युपगमात् ॥ हरिभद्रसूरिणापि सम्यक्त्वदीक्षारोपणावसरे श्राद्धानां धनधान्यस्वजनपरिजनादिसमेतस्यात्मनो गुरुसमर्पणाभिधानेन तत्स्वीकारस्य समर्थनात् ॥

अर्थः—आगममां पण तेमज कह्युं छे जे जेनी स्थिति पूर्वपुरूषे करेली मर्यादा एटले गच्छनी स्थिति तेने जो अतिक्रमे तो अनंत संसारी थाय, इत्यादिके करीने पोते अंगिकार कर्या जे गुरु तेनो त्याग करे ने अन्य गुरूनो जो अंगिकार करे तो श्रावकने अनंतसंसारीपणानी प्राप्तिनुं प्रतिपादन कर्युं तेणे करीने आ अमारा कहेला अर्थनी प्राप्ति थाय छे ए हेतु माटे. ने हरिभद्रसूरिये पण समकित दीक्षा आपवाना अवसरमां श्रावकने धन धान्य स्वजन परिजनादिके सहित एवो पोते श्रावक गुरूने अर्पण थाय एम कहेवाथी ते सर्वनो अंगीकार गुरूने थयो एम प्रतिपादन कर्युं छे ए हेतु माटे.

टीकाः—॥ यदाह ॥ अह तिपयाहिणपुव्वं, सम्मं सुद्धेण चित्तरयणेण ॥ गुरूणो निवेयणं सव्वहेव दढ मप्पणो इत्थ ॥

अर्थः—जे माटे तेमनुं वचन छे जे अथ त्रण प्रदक्षिणा करवापूर्वक शुद्ध चित्तरत्ने करीने सारी रीते सर्व प्रकारे गुरुने आत्मानुं निवेदन दृढपणे अहीं करवुं.

टीकाः—गुरुणा च श्राद्धानां श्रद्धानुगुण्येन दानोपदेशात् ॥ गुरोस्तत्स्वीकारं विना च तेषां तथा निवेदनाद्यनुपपत्तेः ॥ अन्योन्यापेक्षत्वात्स्वीकारस्य ॥ अन्यथेत्थमात्मनिवेदनाभिधानस्य लोकपंक्तिमात्रफलत्वापत्तेः॥ एतेन दिग्बंधोपि गृहिणां यतिवन्न दुष्यतीति ॥

अर्थः—गुरुए श्रावकनी श्रद्धाने अनुसारे दान आपवानो उपदेश करवो ने गुरु जो ते श्रावकनो अंगीकार न करे त्यारे श्रावके जे पोतानुं निवेदन कर्युं ते न कर्या जेवुं थाय. केम जे पोतापणानो जे अंगीकार छे तेने परस्परनी अपेक्षापणुं छे ए हेतु माटे. ॥ भावार्थ ॥ श्रावक पोताना गुरू जाणे तो गुरू पोताना श्रावक जाणे ने एम न कहीए तो ए प्रकारना आत्म निवेदननुं केहेवुं ते लोक व्यवहार मात्र फल थाय एणे करीने जेम साधुने दिग्बंध छे एटले पोतपोताना आचार्य उपाध्याय करी प्रवर्त्तवापणुं छे ते निर्दोष छे तेम श्रावकने पण दिग्बंध दोष भणी नथी एटले श्रावकने पोताना गुरूने पोताना श्रावक करी राखवा ॥ ५ ॥

टीकाः—तथा चैत्यसदनस्वीकारोप्यधुनातनमुनीनां समीचीनः ॥ उक्तन्यायेन संप्रति गृहमेधिनां चैत्यचिंतां प्रति निरवधानतया यतिस्वीकारमंतरेण कालेन तद्भ्रंशसंभवात् ॥ मार्गलोपप्रसंगेन चागमेप्यर्थापत्त्या तत्स्वीकारस्याभिधानात् ॥

अर्थः—वली चैत्यनो एटले चैत्य पोतानुं करी राखवुं, ते पण

आ कालना मुनिने युक्त (घटे) छे केम जे पूर्वे कह्यो जे न्याय तेणे करीने आ कालना गृहस्थ लोकोने चैत्यनी चिंता प्रत्ये सावधानपणुं नथी माटे यतिये ते चैत्यनो अंगिकार कर्या विना काले करीने तेनो उच्छेद थवानो संभव छे ए हेतु माटे मार्गलोप थवानो प्रसंग प्राप्त थाय ते माटे शास्त्रमां पण ते चैत्यने पोतानुं करी राखवुं एम कहेवापणुं छे.

टीकाः—सीलेह मंखफलए इयरे चोअंति तंतुमाईसु ॥ अहिजुञ्जंति सवित्तिसु? अणिच्छफेग्गंतदीसंता॥अत्रहि लिंगिनः प्रति सुविहितानां चैत्यसमारचनादिव्यापारणमुक्तं ॥ नच तत्स्वीकारं विना तेषां तत्संभवति॥ अस्वीकृते च वस्तुनि इतरप्रेरणयापि प्रायेण लौकिकानां समारचनाद्यप्रवृत्तेरिति ॥ ६ ॥

अर्थः—आ जगाए लिंगधारी एम बोले छे जे प्रत्येक सुविहितने चैत्यनी सार संभाल राखवादि व्यापार कह्यो छे, ते चैत्यनो पोतापणानो अंगीकार कर्यो विना ते सार संभाळ राखवानो संभव नथी. केमजे जे वस्तुनो अंगिकार कर्यो नथी तेमां बीजो प्रेरणा करे तो पण बहुधा ए लोकनी सुधारवाने विषे प्रवृत्ति देखाती नथी माटे ॥ ६ ॥

टीकाः—तथा न विद्यते प्रेक्षितं प्रत्युत्प्रेक्षणा चक्षुषा निरीक्षणमादिशब्दात्प्रमार्जनं रजोहरणादिना सूक्ष्मजीवापसारणं च यत्र तत्, आसनं विष्टरं स्यूतगब्दिकादि शुषिरगंभीरसिंहासनादौ च प्रत्युपेक्षणादि यतीनां न शुध्यति, तेन च तत्र न कल्पते उपवेष्टुं चैत्यवासिनस्त्वेवं प्रतिपद्यंते ॥ प्रवच-

प्रभावनाहेतोस्तादृशासनोपवेशनस्यापि साधीयस्त्वात् प्रवचनप्रभावनायाः प्रधानदर्शनांगत्वेन यथाकथंचन विधेयत्वात् ॥

अर्थः--वळी नथी पडिलेहण एटले नेत्र वडे देखवुं. आदि शब्दथी प्रमार्जवुं, रजोहरणादिक करीने सूक्ष्म जीवनुं दूर करवुं ने जेमां एवुं आसन एटले दोरडाए शीवेली गादी तकीया तथा जेमां गंभीर छिद्र छे, एवां सिंहासनादि तेने शुद्ध पडिलेहणादि थइ शकतां नथी ते माटे तेने विषे बेसवुं न कल्पे तेने चैत्यवासी लिंगधारीतो एम माने छे जे प्रवचननी प्रभावना थवानुं कारण छे माटे तेवा गादी तकीयामां तथा तेवां सिंहासनादिकमां मुनिने बेसवुं ते अतिशे सारुं छे केम जे ते तो प्रवचननी प्रभावनानुं प्रधान देखातुं अंग छे माटे जे ते प्रकारे गादीए तथा सिंहासन उपर बेसवानुं अवश्य करवा योग्यपणुं छे एटले कल्पे छे ॥

टीकाः—॥ यथोक्तं ॥ नाणाहिउ वरतरं, हीणो वि हु पवयणं पभाविंतो इति ॥ तथा सिंहासनोपवेशनस्य गणधराणां व्याख्यानविधावागमेऽपि श्रवणात् ॥ यदाह ॥ राउवणीयसीहासणोवविठो व पायपीढंमि ॥ जिठा अन्नयरा वा गणहारि कहेइ वीयाए॥तथाच तदनुसारेणाधुनिकसूरीणामपि धर्मदेशनादौ तदुपवेशनस्य समीचीनत्वात् ॥

अर्थः—ते शास्त्रमां कह्युं छे जे ज्ञानथी तथा चारित्रथी रहित होय तो पण प्रवचननी प्रभावना करता इत्यादि. वळी व्याख्यान विधिने विषे गणधर सिंहासन उपर बेसता एवुं आगममां पण सांभळीए छीए, ते आगमनुं वचन ए छे जे राजाये आपेला सिंहासन उपर तथा पादपीठ उपर बेठा जेष्ठ गणधारी अथवा अ-

न्यतर गणधर बीजी पोरुषीमां देशना करे ते प्रकारे आ कालना आचार्योंने पण धर्मदेशनादिकने विषे ते उपर बेसवुं ते ठीक छे.

टीकाः—अत एव भगवान् दशपूर्वधरः श्री वैरस्वामी, अहो भगवतः सर्वातिशायिनी व्याख्यालब्धिः किंतु न तादृशी रूपसंपदिति राजांतःपुरावचनाकर्णनानंतरं द्वितीयेन्हि नैसर्गिकीं शरीरसौंदर्यसंपदमाविर्भाव्य यत्यऽनुचितमपि हिरण्मयकुशेशयमध्यास्य प्रवचनप्रभावनार्थे संसदि धर्मकर्मकथां प्रथयांबभूवेति ॥ ततः सिद्धमिदमाचार्याणां गद्दिकाद्यासनमुपादेयं, प्रवचनप्रभावनांगत्वात्, सम्मत्याद्यध्ययनवदिति॥७॥

अर्थः—एज कारण माटे भगवान् दश पूर्वधर श्री वयरस्वामी तेमने देखीने राजाना अंतेउरनी स्त्रीओए एम कह्युं जे अहो भगवान् वयरस्वामीनी व्याख्यान लब्धि तो सर्व करतां अतिशे छे पण तेवी कांइ रूप संपत्ती नथी एवुं वचन सांभलीने त्यार पछी बीजे दिवसे पोतानी स्वाभाविक शरीर सुंदरता संपत्ति प्रगट करीने यतिने अघटित एवुं पण सोनामय कमल तेने विषे बेसीने प्रवचननी प्रभावना थवाने अर्थे सभामां धर्म देशना विस्तारता हवा ए कारण माटे ए वात सिद्ध थइ जे आचार्योंने गादी आदि आसन ग्रहण करवुं, केमजे प्रवचननी प्रभावनानुं अंग छे ए हेतु माटे संमति आदिक शास्त्रना अध्ययननी पेठे जेम संमत्यादिकनुं अध्ययन छे ते प्रवचननी प्रभावनानुं अंग छे तो आचार्यने करवा योग्य छे तेम.

टीकाः—तथा सावद्यं सपापमाचरितं आचरणा गृहिणां नियतगच्छभजनादिलक्षणं ॥ तत्रादर आग्रहः॥ आचरणा हि

निरवद्यैव प्रमाणं एषा च सावद्या गृहिदिग्बंधाद्याचरणाभ्यु पगमे हि यतेस्त द्विधीयमाननिखलपापारंभानुमत्याद्यापत्तेः तथाप्येषा चैत्यवासिभिरादृता

अर्थः—वली पाप सहित जे आचरण एटले गृहस्थोने नियमाए पोतपोताना गच्छने भजवुं ए आदि जेनुं लक्षण छे तेने विषे आदर एटले जे आग्रह (आचरण) छे ते पाप रहित होय तेज प्रमाण छे ने आ जे पाप सहित गृहस्थोने दिग् बंधादि आचरणा तेनो अंगिकार करवाने विषे निश्चे यतिने ते गृहस्थोए करवा मांडया जे समस्त पापना आरंभ तेमां अनुमोदनादिकनी प्राप्ति छे ए हेतु माटे सावद्य छे. तो पण ए सावद्य आचरण चैत्यवासिये आदर्युं छे.

टीकाः—यतस्तेषामयमाशयः क्षेत्रकालाद्यपेक्षया हि सर्वं जैन मतानुष्ठानं व्यवस्थितं ॥ ततो यदि गृहिनियतगच्छभजनादिकामाचरणां वयं नाद्रियेमहि ततः कषायकलुषितहृदयत्वात्प्रायेण संप्रतितनयतीनां गृहस्थान्योन्याकृष्ट्या कलहेनाव्यवस्थायां सर्वमसमंजसमापद्येत तस्मादेषाप्याचरणा ऽद्यतनकालापेक्षया युक्तिमती

अर्थः—जे हेतु माटे ते चैत्यवासीनो आ अभिप्राय छे जे क्षेत्र कालादिकनी अपेक्षाये सर्व जैनमतनुं अनुष्ठान निश्चे रह्युं छे ते हेतु माटे जो गृहस्थने पोत पोताना गच्छनी भजनादिक आचार ते प्रत्ये अमो न आदर करीए तो, कषाय वडे अंतर मेलां थएलां छे माटे बहुधा आ कालना यतिने गृहस्थोनुं परस्पर खेंचवाथी कलेशे करीने अमर्यादाए करीने सर्व अघटतुं थाय माटे आ पण आचरण आ कालनी अपेक्षाये युक्त छे.

टीकाः—॥ यदुक्तं उत्पद्यते हि सावस्था देशकालामयान् प्रति ॥ यस्य मेऽकार्यं कार्यं स्यात्कार्यं कर्म च वर्ज्जयेदिति॥८॥

अर्थः—जे माटे शास्त्रमां कह्युं छे जे देश कालने रोगादि प्रत्ये मारी ते अवस्था उत्पन्न थाय छे जेमां न करवानुं करवा योग्य थाय छे ने करवा योग्यनो त्याग थाय छे ॥८॥

टीकाः—तथा श्रुतस्य सिद्धांतस्य पंथा मार्गस्तत्रावज्ञाऽनादरस्तेह्येवमाहुः भगवत्सिद्धांतो हि नैकांतेनैव विहितानुष्ठाननिष्ठः निषिद्धानुष्ठाननिषेधनिष्ठोवास्ति॥ विहितानामपि केषांचिदनुष्ठानानां क्वचिन्निषेधात् ॥ निषिद्धानामपि क्वचिद्विधानात् ॥ अतोनास्थामास्थाय सिद्धांतव्यवस्थया केवलया किमपि कर्त्तुं परिहर्त्तुं वा पार्यते ॥

अर्थः—वळी सिद्धांतनो जे मार्ग तेनो अनादर ते लिंगधारी एम कहे छे जे भगवाननो जे सिद्धांत छे ते अनेकांत छे ते एकांतपणे करवा योग्य जे अनुष्ठानक्रिया तेने विषे तत्पर नथी. एटले एकांतपणे आ क्रिया तो करवीज एम सिद्धांत कहेतुं नथी. ने निषिद्ध जे अनुष्ठान तेनो निषेध करवामां पण तत्पर नथी. एटले एकांतपणे आ क्रिया तो नज करवी एम सिद्धांत कहेतुं नथी केम जे करवा योग्य केटलांक अनुष्ठान तेनो पण कोइ जगाए निषेध देखाय छे ए हेतु माटे ने निषेध करेलां पण केटलांक अनुष्ठान तेनुं कोइ जगाए करवापणुं छे ए हेतु माटे. केवल सिद्धांतमां कहेलुं छे ते उपर आस्था राखीने कांइ पण करवा योग्य तथा परिहरवा योग्य पार पामीए एम नथी.

टीकाः—॥ एवंच ॥ नविकिंचि अणुन्नायं पडिसिद्धं वा वि जिणवरिंदेहिं ॥ इति वचनादागमबहिष्टापि काचित्सुकुमारा क्रियाऽद्यतनसाधुप्रवर्त्तिता विवेकिनां निःश्रेयसाय नवि-ष्यति किं श्रुतेनेति॥ यदुक्तं रूग्विणः कल्पतां यांति मृद्व्या-पि क्रियया यथा ॥ कालेन धर्म क्रियया तथा मुक्तिं शरि-रीण इति ॥ ए ॥

अर्थः—ते उपर वली शास्त्र वचन छे जे जिनवरे कांइ पण आज्ञा करेलुं नथी तेम निषेध्युं पण नथी ए प्रकारना वचनथी; आगमथी वेगली रही एवी पण कोइक सुखे सुखे थाय एवी क्रिया-ने आ काळना साधुए प्रवर्त्तावेली एवी पण क्रिया ते मोक्षजणी थशे माटे शुं शास्त्रवते छे कांइ पण नथी. जे माटे कह्युं छे जे थोडी क्रियाये करीने रोगीयानो रोग जाय त्यारे जाजी क्रियानुं शुं प्रयोजन छे! शास्त्रमां तेम सुखे सुखे थती जे आ क्रिया तेणे करी देहधारी मुक्ति पामे छे. जेम घणा काल सुधी धर्मक्रिया करे छे तेणे करीने मुक्ति पामे छे ॥ ए ॥

टीकाः—तथा गुणिषु ज्ञानादिगुणवत्सु यतिषु द्वेषधी मा-त्सर्यबुद्धिः ॥ स्वयं निर्गुणानां तद्गुणानसहिष्णूनां तदुपजि-घांसया दुष्टामतिरिति यावत् ॥ कथमियं तन्मते न धर्म इति चेडुच्यते ॥ इदानीं हि नगवद्भिरहात्सम्यग् मार्गापरिज्ञानेन ब-हुलोकप्रवृत्तिरेव मोक्षमार्गः ॥ महाजनो येन गतः स पंथा इति न्यायात् ॥

अर्थः—वली ज्ञानादि गुणवान् जे यति तेमने विषे द्वेषबुद्धि

एटले मत्सर बुद्धि पोते निर्गुण छे ने गुणवानना गुण सहन नथी करता माटे तेमने मारवानी इच्छा राखे छे माटे दुष्ट बुद्धिवाला ते वेषधारी छे आशंका कहे छे जे गुणी पुरुष उपर द्वेषबुद्धि राखवी तेने धर्म कीये प्रकारे लिंगधारी थापे छे, तो कहीएछीए जे आ कालमां निश्चे भगवाननो विरह थयो छे माटे सारी रीते मोक्षमार्गनुं ज्ञान नथी थतुं ते हेतु माटे बहु लोकनी जे प्रवृत्ति तेहीज मोक्ष मार्ग छे केम जे जे मार्गे महाजन एटले घणा लोक चाले ते मार्ग छे एवो न्याय छे माटे ॥

टीकाः—एते च परगृहवासिनो धार्मिकंमन्या आत्मानमेवैकं गुणैरुत्कर्षयंतो निखिलानप्यपरान् दूषयंत ऐदंयुगीनं संघमप्य वमन्यमाना स्तत्प्रवृत्तिं दूरेण परिहरंतो लोकव्यवहारमप्यजानंतः संघबाह्या एव अतः सर्वथैत उच्छेत्तव्या इति द्वेष एवैतेषु श्रेयानिति ॥ १० ॥

अर्थः—वली ते लिंगधारी एम कहे छे जे आ परघरमां रहेनाराने पोताने विषे धार्मिकपणुं माननाराने पोताना आत्मानेज एक गुणे करीने मोटो देखाडताने बीजा सर्वेने पण दोष पमाडताने आ कालना संघने पण न मानताने आ कालना संघनी प्रवृत्तिने पण छेटेथी परिहरताने लोक व्यवहारने पण न जाणता माटे ते संघ बाहार छेज. ए हेतु माटे सर्व प्रकारे उछेदवा योग्य छे. ए प्रकारनो जे द्वेष करवो तेज एमने विषे अतिशेश्रेष्ठ छे इत्यादि ॥१०॥

टीकाः—गौतमादिषु वर्त्तित्वात्तादृशेषु यतिध्वनिः ॥ कथमेतेषुवर्त्तेत निर्गुणेष्वंजसेषुचेत् ॥१॥ कल्पक्षोणीरुहां यद्वत्गुणा योगेपिवर्त्तते ॥ निंबादिषु तरुध्वानो विनाविप्रतिपत्तितः ॥

अर्थः–एवी रीते दश प्रकारनो धर्म प्ररुपण करनार ते निर्गुण आ कालना वेषधारी तेने विषे मुनि शब्द केम प्रवर्त्ते छे ? केम जे मुनि शब्द तो गौतमादि महान् पुरुष तेने विषे प्रवर्त्तेलो छे माटे त्यां उत्तर कहे छे जे जेम लिंब आदि वृक्षनेविषे कल्प वृक्षना गुण नथी, तो पण केवल रुढीथी तरु ए प्रकारनो शब्द प्रवर्त्ते छे. तेम ते लिंगधारीने विषे मुनि शब्दनी प्रवृत्ति रुढीथी छे.

टीकाः–यथाच जात्यरत्नानां गुणाभावेपिताहशां ॥ काच सांद्रां शुचिर्चिक्ये मणी शब्दः प्रवर्त्तते ॥ ३ ॥ गौतमादि गुणायोगे–पीदानींतन साधुषु ॥ उद्यच्छत्सु स्वशक्त्यैवं प्रवर्त्स्येति यति ध्वनिः ॥ ४ ॥ इति वास्तवक्षांत्यादि दशविधयतिधर्म स्पर्द्धयेव यथाछंदैः प्रदर्शितो धर्मः अयं चेत्कर्महरो भवेदित्यादि पूर्वव्याख्यातमिति वृत्तार्थः ॥ ५ ॥

अर्थः–वली जेम जातिवंत रत्नना गुण न होय, तो पण काचना कककानो घणा किरणनो चकचकाट छे तेने विषे मणी शब्द प्रवर्त्ते छे. तेम ते लिंगधारीने विषे मुनि शब्द प्रवर्त्ते छे ॥ गौतमादि मुनिने विषे रह्या जे गुण ते गुण आ कालना साधुने विषे नथी तो पण पोतानी शक्तिये उद्यम करनारने विषे यति शब्द प्रवर्त्तशे ॥ ४ ॥ ए प्रकारे साचो जे क्षमाआदि दश प्रकारनो यति धर्म तेनी स्पर्द्धाये जाणे शुं लिंगधारीउए देखाड्यो जे धर्म आ जो कर्मने हरे तो मेरु समुद्रमां तरे इत्यादि पूर्वे व्याख्यान कर्युं छे ए प्रकारे पांचमा काव्यनो अर्थ थयो ॥ ५ ॥

टीकाः—सांप्रतमेतानि दशद्वाराणि यथाक्रमं प्रत्याचिख्यासुः प्रथमं तावज्जीवोपमर्दनाद्यनेकदोषाविर्भावपुरस्सरं औद्देशिकभोजनद्वारं प्रत्याख्यातुमाह ॥

अर्थः—हवे ए दश द्वारने अनुक्रमे खंकन करता ग्रंथकार प्रथम जीवनो नाश ए आदि अनेक दोषने प्रकट करी देखाकवा पूर्वक औद्देशिक भोजनद्वारनुं खंकन कहे छे.

मूलकाव्यं.

षट्कायानुपमृद्य निर्दयमृषी नाधाय यत्साधितं
शास्त्रेषु प्रतिषिध्यते यदसकृद्भिः स्त्रिशताधायि यत् ॥
गोमांसाद्युपमं यदाहु रथयद्भुत्का यतिर्यात्यधः
स्तत्को नाम जिघित्सती (जिघृक्षतीत्यपिपाठांतरं) ह
सघृणः संघादि भक्तिं विदन् ॥ ६ ॥

टीकाः—कः सघृणो दयालुः विदन् संघादिनिमित्तमेतन्निष्पन्नमितिजानन् इहेति प्रवचने जिघित्सति अत्तुमिच्छति ॥ अदेः सनंतस्य घसादेशोरुपं किं तत् संघः साधुसाध्वीरुपः श्रमणगणः आदिशब्दादेकद्विआदि श्रमणपरिग्रहः तस्य भक्तं तत्कृते निर्वृत्तमशनादिनामेति कुत्सायां अतीवकुत्सितमेतद्भक्तं मुनीनां ॥ जानतो मुनेः कृपालोरेवं विधं भक्तं भोक्तुं न कल्पत इत्यर्थः ॥

अर्थः—कोण दयालु पुरुष आ, संघादिनिमित्ते निपजाव्युं छे एम जाणतो आ जिन शासनने विषे भोजन करवा इच्छे अर्थात् कोइ न इच्छे. आ जगाए व्याकरणः—जे सन् प्रत्ययांत जे अद् भक्षणे

धातु तेनो घसादेश थये सते जिघित्सति एवुं रुप थयुं छे ।।संघ।।ते।। साधुसाधवीरुप श्रमणनो समूह छे।। आदि शब्दथी एक बे त्रण आदि साधुनुं ग्रहण करवुं तेथी आ प्रकारे अर्थ थयो जे एक साधुने निमित्ते नीपजाव्युं भोजनादि बे साधुने निमित्ते निपजाव्युं भोजनादि त्रण साधु० इत्यादि।।आ जगाये नाम शब्दनो निंदितरुपी अर्थ जाणवो. तेथी आम अर्थ थयो जे आ भोजन साधु निमित्त नीपजाव्युं छे एम जाणीने पण तेनुं ग्रहण करवुं ते अति निंदित छे, ए प्रकारनुं भोजन कृपालु मुनिने भोगववुं न कल्पे एटलो अर्थ थयो.

टीकाः—अत्रच विदन्निति ग्रहणाच्छ्रुतोपयोगेन बाह्यलिंगपरिक्षापुरःसरं यतमानस्य यतेः कदाचिदाधाकर्मग्रहणेऽपि सम्यगनवगमात्तद्भुंजानस्यापि न दोषः ॥ यथोक्तं ॥ थोवंति न पुठं न कहियं व गूढहि नायरो वकओ ॥ इयछलिओ विन लग्गइ सुउं वउत्तो असढ भावो ॥

अर्थः—आ जगाये विदन् ए प्रकारना शब्दनुं गृहण कर्युं छे माटे शास्त्रना उपयोगे करीने बाहारना चिन्हथी परीक्षापूर्वक यतनायेथी ग्रहण करता एवा साधुने क्यारेक आधाकर्मि आहारनुं ग्रहण थाय तो पण सम्यक् न जाणवाथी तेनुं पण भोजन करे छे तो पण दोष नथी ।। ते शास्त्रमां कह्युं छे जे

टीकाः—अथैतस्मिन् को दोषो येनैतदेवं कुत्सितमत आह यत्साधितं तच्छब्दस्य यच्छब्देन नित्याभिसंबंधात्तश्च यद् भक्तं साधितं निष्पादितं गृहस्थेनेति शेषः ॥ किं कृत्वा आधाय उद्दिस्यकान् ऋषीन् यतीन यतिभ्यो मयैतद्देयमिति मनसिकृत्वेत्यर्थः ॥

अर्थः–आशंका करी कहे छे जे ए भोजनमां शो दोष छे जे हेतु माटे एने आवुं निंदित कह्यो छो तो त्यां कहे छे जे तत् शब्दने यत् शब्द साथे नित्ये संबंध छे माटे जे भोजन सिद्ध कर्युं छे एटले निपजाव्युं छे (गृहस्थपद उपरथी लेवुं) तो अर्थ आम थयो जे, गृहस्थ जे तेणे साधुने उद्देशिने निपजाव्युं जे आ भोजन मारे साधुने आपवुं एम मनमां धारीने कर्युं एटलो अर्थ छे.

टीकाः–अथ निरवद्यवृत्या यतिनिमित्तं साधितेप्यस्मिन् कोदोष इत्यत आह ॥ उपमृद्य विध्वस्य कान् षटकायान् ॥ षट्विधजीवनिकायान् कथं उपमृद्येत्याह। निर्दयमिति क्रिया विशेषणं निरनुकंपं यथा भवति ॥ अयमर्थ एतावत्किल वन्हिपाकारंभो न सानुकंपस्य नापि षट्जीवनिकायोपमर्दनमंतरेण संभवति ॥ एवं च निरवद्यवृत्या न भक्तसाधनं कथमपि संगछते ॥

अर्थः–आशंका करी कहे छे जे पापरहित क्रियाए करीने यति निमित्त भोजन सिद्ध करे तेमां शो दोष छे तो त्यां कहे छे जे छ जीवनिकायनुं उपमर्दन करीने कीय प्रकारे ? तो निर्दयपणे, निर्दय पद छे ते उपमर्दनरुप क्रियानुं विशेषण छे एटले आम अर्थ थयो जे निर्दयपणे छ जीवनिकायनुं मर्दन करी ए भोजन साधु निमित्ते नीपजाव्युं छे ते अग्निपाकनो आरंभ ते दयालुने न होयने षट् जीव निकायना मर्दनविना ते पाक पण संभवे नहीं माटे पापरहित क्रियाये करीने पाक साधन कोइ प्रकारे पण थाय नहीं.

टीकाः–यदर्थं चैतावानारंभस्तस्य तज्जन्यसकलपापानुषंगात्भवतभंगप्रसंगः ॥ यदाह ॥ जस्सट्ठा आहारो आरंभो त-

स्स होइ नियमेण ॥ आरंभे पाणी वहो पाणी वहेहोश्वयभंगो ॥ अतःकथमस्य भक्तस्य न कुत्सितत्वं ॥

अर्थः–जेने अर्थे आटलो बधो आरंभ छे तेने ते अर्थ आरंभथी उत्पन्न थयुं जे सकल पाप तेनो संबंध थवाथी व्रत भंगनो प्रसंग थशे. जे माटे शास्त्रमां कह्युं छे जे जेने अर्थे आहारनो आरंभ छे तेनेज नियमाए पाप छे केम जे आरंभने विषे प्राणीनो वध होय ने प्राणी वध थयो एटले व्रतनो भंग थयो माटे ए भोजननुं निंदितपणुं केम न होय अपितु होयज ॥

टीकाः–एतेन वस्तुत आधाकर्मपर्यायता संघादिभक्तस्य सूचिता ॥ आहाय वियप्पेणं जइण कम्ममसणाइ करणंज० ॥ छक्कायारंभेणं तं आहाकम्माहंसु ॥ इत्यागमे आधाकर्मशब्द स्यैवं व्युत्पादनात्

अर्थः–एणे करीने वस्तुताये आधाकर्मनुं पर्यायपणुं संघादि भोजनने छे एम सूचना करी ॥ केम जे तेनुं लक्षण शास्त्रमां कह्युं छे जे जेने मनमां धारीने छ कायनो आरंभ करवो तेने आधाकर्म कहे छे, इत्यादि आगमने विषे आधाकर्म शब्दनी ए प्रकारे व्युत्पत्ति करी छे ए हेतु माटे

